Shri Raghunatha Temple MSS. Library,
JAMMU

No. ३५८
घ

Title संक्षेपशङ्करजयः

Author माधवः

Extent ६ पत्र Age

Subject वेदान्त

© Dharmartha Trust J&K. Digitized by eGangotri

संक्षेपशंकरजयः

३५८

पत्राणि

© Dharmartha Trust J&K. Digitized by eGangotri

नं. ११८८

यंप्रभातंचहुताशसेवीव्रतेनवेदंनिजमध्यगीष्ट॥६॥क्रियाद्यनुष्ठानफलोर्थबोधःसनोप
जायेतविनाविचारं।अधीत्यवेदानथतद्विचारंचकारदुर्बोधतरोहिवेदः॥७॥वेदेष्वधीतेषु
विचारितेष्वेषशिष्यानुरागीगुरुराहतंस्म।अपाठिमन्त्रःसषडंगवेदोव्यचारिकालोबहुरत्य
गात्ते॥८॥भक्तोपिगेहंव्रजसंप्रतित्वंजनोपितेदर्शनलालसःस्यात्।गत्वाकदाचित्स्वजनप्रमो
दंविधेहिमातानविलंबयस्व॥९॥विधातुमिष्टंयदिहापराह्णेविजानतातत्पुरुषेणपूर्वं।विधे
यमेवंयदिहह्यद्यइष्टंकर्तुंनतद्द्येतिविनिश्चितोर्थः॥१०॥कालोप्तबीजादिहयादृशंस्यात्तस्यैनता
दृग्विपरीतकालात्।तथाविवाहादिकृतंस्वकालेफलायकल्पेननचेदृथातत्॥११॥आजन्म
नोगणयतोननुतान्गनाश्चान्मानापितापरिणायंनवक्तुकामो।पित्रोरियंप्रकृतिरेवपुरोप
नीतिंयद्यायतस्तनुभवस्यततोविवाहं॥१२॥तत्तत्कुलीनपितरस्पृहयंतिकामंतत्तत्कुलीनपु

© Dharmartha Trust J&K. Digitized by eGangotri

रुषस्यविवाहकर्म।पिंडप्रदानृपुरुषस्यससंतनितेपिंडाविलोपमुपरिस्फुटमीक्षमाणाः॥
॥१३॥अर्थावबोधनपरोहिविचारएषतच्चापिचित्रबहुकर्मविधानहेतोः।तत्राधिकारम
४ धिगच्छतिसद्वितीयःकृत्वाविवाहमितिवेदविदांप्रवादः॥१४॥सत्यंगुरोननियमोस्तिगुरो
रधीतवेदोगृहीभवतिनान्यपदंप्रयाति।वैराग्यवान्व्रजतिभिक्षुपदंविवेकीनोचेद्गृहीभव
तिराजपदंनदेनत्॥१५॥श्रीनैष्ठिकाश्रममहंपरिगृह्ययावज्जीवंवसामितवपार्श्वगतश्चिरा
युः।दंडाजिनीसविनयोबुधजुष्टदृग्नौवेदंपठन्पठितविस्मृतहानिमिच्छन्॥१६॥दारग्रहोभ
वनितावदयंसुखाययावत्कृतोनुभवगोचरतांगतःस्यात्।पश्चाच्छनैर्विरसतामुपयाति
सोयंकिंनिकुषेत्वमनुभूतिपरंमहात्मन्॥१७॥यागोपिनाकफलदोविधिनाकृतश्चेच्छ्रायःस
मग्रकरणंभुविदुर्लभंतत्।दृष्टाद्दिवन्नहिफलंयदिकर्मणिस्याद्दृष्टायथोक्तविरहेफलदु ८

र्विधलं॥१८॥निःस्वोभवेयदिगृहीनिरयीसनूनंभोक्तुंनदातुमपियःक्षमतेणुमात्रं।पूर्णोपिपू
र्तिमभिमंतुमशक्नुवन्योमोहेनशानमनुतेखलुतत्रतत्र॥१९॥यावद्वसुस्वसुपरिपूर्तिरथो
अमीषांसाधोगृहोपकरणेषुसदाविचारः।एकत्रसंहतवतःस्थितपूर्वनाशस्तत्त्वापयाति
पुनरप्यपरेणयोगः॥२०॥एवंगुरौवदतितज्जनकोनिनीषुरागच्छदत्रतनंस्वगृहंगृहेशः।तेना ५
नुनीयबहुलंगुरवेप्रदाप्ययत्नान्निकेतनमनायिगृहीनविघ्नः॥२१॥गत्वानिकेतनमसौजननींव
वंदेसालिंग्यतद्विरहजंपरितापमोज्झत्।प्रायेणचंदनरसादपिशीतलंनघस्तुत्रगात्रपरिरंभण
नामधेयं॥२२॥श्रुत्वागुरोःसहनतश्चिरमागतंतंतद्बंधुरागमदथत्वरितेक्षणाय।प्रत्युद्गमादिभि
रसावपिबंधुतायाःसंभावनांव्यधितवित्तकुलानुरूपां॥२३॥वेदेपरक्रमजटादिषुतस्यबुद्धिंसंवी
क्ष्यतज्जनयितावहुशोप्यपृच्छत्।यस्याभवत्प्रथितनामवसुंधरायांविद्याधिराजइतिसंगतवाच्यम

© Dharmartha Trust J&K. Digitized by eGangotri

स्य ॥२४॥ भाद्रेनयेगुरुमतेकलाभुज्ञतादौ प्रश्नं चकार तनयस्य मतिं बुभुत्सुः ॥ शिष्योप्युवाचन
तपूर्वं गुरुः समाधिं पित्रोदितः स्मितमुखो हसितांबुजास्यः ॥२५॥ वेदे च शास्त्रे च निरीक्ष्य बुद्धिं
प्रश्नोत्तरादावपि नैपुणीतां । दृष्ट्वातुतोषातितरां पितास्य स्वतः सुखायाकिमु शास्त्रतो वा कुः ॥२६॥
कन्यां प्रदातुमनसो बहवोपि विप्रास्तन्मंदिरं प्रतिययुर्गुणपाशकृष्टाः । पूर्वं विवाहसमयाद्दपित
स्य गेहं संबधवत्किल बभूव वरीतुकामैः ॥२७॥ बह्वर्थदायिषु बहुष्वपि सत्सु देशे कन्याप्रदातृषु परी
क्ष्य विशिष्टजन्मा । कन्या मया च तनसुताय स विप्रवर्यो विप्रं विशिष्टकुलजं प्रथितानुभावः ॥२८॥ क
ह न्यापितुर्वरपितुश्च विवाँ आसीदित्थं तयोः कुलजुषोः प्रथितोरुभूत्योः । कार्यस्त्वया परिणयो गृह
मेत्य पुत्रीमानीय स प्रतनयाय सुता प्रदेया ॥२९॥ संकल्पिता द्विगुणमर्थमहं प्रदास्ये मद्गेहमेत्य
परिणीतिरियं कृता चेत् । अर्थं विना परिणयं द्विजकारयिष्ये पुत्रेण मे गृहगताय हि कन्यका स्यात् ॥३०॥ १६

© Dharmartha Trust J&K. Digitized by eGangotri

कश्चित्तुतस्याःपितरंबभाणमिथःसमाहूयविशेषवादी।अस्मासुगेहंगतवत्सुमुख्येविगृह्यक
न्याममपरःप्रदद्यात्॥२१॥तेनानुनीतोवरतातभाषितंद्विजोनुमेनेवररूपमोहितः।दृष्टोगु
णःसंवरणायकल्पतेमंत्रोभिजापाच्चिरकालभाविनः॥२२॥विद्याधिराजमघपंडितनामधेयौ
संप्रत्ययंस्वतनुतामभिपूज्यदेवं।सम्यङ्मुहूर्तमवलंब्यविचारणीयामौहूर्तिकादतिपरस्परमू
चिवांसौ॥२३॥उद्वाहलक्षणशास्त्रविधिनाविहितेमुहूर्तेतौसंमुदंबहुमवापतुराप्तकामौ।तत्रागतोभृश
ममोदतबंधुवर्गःकिंभाषितेनबहुनामुदमापवर्गः॥२४॥तौदंपतीसुवसनौशुभदंतपंक्तीसंभूषि
तौविकसितांबुजरम्यवक्त्रौसव्रीडहासमुखवीक्षणसंप्रहृष्टौदेवाविवापतुरनुत्तमशर्म
नित्यं॥२५॥अग्नीनथाधितमहोत्तरयागजातंकर्तुंविशेषकुशलैःसहितोद्विजेशः।तत्तत्फ
लंहियदनाहितहव्यवाहःस्यादुत्तरेषुविहितेष्वपिनाधिकारी॥२६॥यागेरनेकैर्बहुवित्तसा

© Dharmartha Trust J&K. Digitized by eGangotri

धौर्विजेतुकामोभुवनान्ययष्ट।यस्मादिदेवैरमृतंतदाशैर्दिनेदिनेसेविनयद्भुभागैः॥३७॥संतर्प
यंतंप्रीतदेवमानुषांस्तत्तत्पदार्थैरभिवांछितैःसह।विशिष्टवित्तैःसुमनोभिरंचितंतंमेनिरेजंग
कल्प मंपादपं॥३८॥परोपकारव्रतिनोदिनेदिनेव्रतेनवेदंपठतोमहात्मनः।श्रुतिस्मृतिप्रोदितकर्मकुर्व
तःसमाययुर्दिनमाससंमिताः॥३९॥रूपेषुमारःक्षमयावसुंधराविद्यासुवृद्धोधनिनांपुरःस
10 रः।गर्वानभिज्ञोविनयीसदानतःसनोपजेभेतनयाननंजरन्॥४०॥गावोहिरण्यंबहुसस्यमालि
नीवसुंधराचित्रपदंनिकेतनं।संभावनाबंधुजनैश्चसंगमोनपुत्रहीनंबहवोप्यमूमुदन्॥४१॥
अस्यामजाताममसंततिश्चेत्कुरग्रवश्यंभवितोपरिष्टात्।तत्राप्यजातातनउत्तरस्यामेवंसका
लंमनसानिनाय॥४२॥खिंदन्मनाःशिवगुरुःकृतकार्यशेषोजायामचष्टसुभगेकिमतःपरंनौ।
सांगंवयोर्द्धमगमत्कुलजेनदृष्टंपुत्राननंयदिहलोक्यमुदाहरंति॥४३॥एवंप्रियेगतवतोसुतदर्श १०

© Dharmartha Trust J&K. Digitized by eGangotri

नैवेपंचवत्समैष्यदथनौ शुभमापतिष्येन अस्याभ्युपायमनिशंभुविवीक्षमाणोनेक्षेततःपितृजनिर्वि
फलाममाभूत्॥४४॥भद्रेसुतेनरहितौभुविकेवदंतिनौपुत्रपौत्रसरणिक्रमतःप्रसिद्धिः।लोकेनपु
ष्पफलशून्यमुदाहरंती।वृक्षंप्रवालसमयेफलितंविहाय॥४५॥इतीरितेप्राहतदीयभार्यातदीय
भार्याशिवाख्यकल्पद्रुममाश्रयावः।नसेवितान्नौभवितासुनाथफलंस्थिरंजंगमरूपमेशं॥४६॥भ
क्तैप्सितार्थपरिकल्पनकल्पवृक्षंदेवंभजावकमितःसकलार्थसिद्ध्यै।तत्रोपमन्युमहिमापरमंप्रमाणंनो
देवतासुजडिमाजडिमामनुष्ये॥४७॥इत्थंकलत्रोक्तिमनुत्तमांसःश्रुत्वासुनाथीप्रणतैकवश्यां।ईयेषसंतो
षयितुंतपोभिःसोमार्द्धमूर्द्धानमुमार्द्धमीशं॥४८॥तस्योपधामकिलसंनिहितापगेकास्नात्वासदाशि
वमुपास्तजलेसतस्याः।कंदाशनःकतिचिदेवदिनानिपूर्वंपश्चान्निराशःशिवपादयुगाब्जभृंगः॥४९॥जा
यापितस्यविमलानियमोपतापैःक्लिष्टाकृशकायमनिशंशिवमर्चयंती।क्षेत्रेवृषस्यनिवसंतमजंसभर्तुःका

© Dharmartha Trust J&K. Digitized by eGangotri

सोत्यगाद्दिनितनयोत्सपतोरनेकः ॥५०॥ देवःकृपापरवशोद्विजवेषधारीप्रत्यक्षतांशिवगुरुंगतआत्र

निद्रं। प्रोवाचभोःकिमभिवांछसिकिंतपस्त्वेपुत्रार्थितेतिवचनंसजगादविप्रः ॥५१॥ देवोपृच्छदित्थतं

द्विजविद्धिसत्यंसर्वज्ञमेकमपिसर्वगुणोपपन्नं। पुत्रंददाम्यथबहूंश्चविपरीतकांस्तेभूर्यायुषस्त्वनुगुणा

नवदद्विजेशः ॥५२॥ पुत्रोस्तुमेबहुगुणःप्रथितानुभावःसर्वज्ञतापदमितीरितआबभाषे। इत्यामुदी

गछ रितपदंतनयंतपोमापूर्णोभविष्यसिगृहंद्विजगच्छदारैः ॥५३॥ आकर्ण्यंनितिबुधेबौसविप्रवर्यस्तंचाब्र

वीनिजकलत्रमनिंदितात्मा ॥ स्वप्नंशशंसवनितामणिरस्यभार्यासत्यंभविष्यतितुनौतनयोमहात्मा ॥५४॥

तौदंपतीशिवपरौनियतौस्मरंतौस्वप्नेक्षितंगृहगतौबहुदक्षिणाग्नैः। संतर्प्यविप्रनिकरंतदुदीरिता

भिराशीभिरापतुरनल्पमुदंविशुद्धौ ॥५५॥ तस्मिंदिनेशिवगुरोरुपभोक्ष्यमाणेभक्तेप्रविष्टमभवत्कि

लशैववतेजः। भुक्तान्नविप्रवचनादुपभुक्तशेषंसोभुंक्तसापिनिजभर्तृपदाब्जभृंगी ॥५६॥ गर्भंदधारशिव १९

© Dharmartha Trust J&K. Digitized by eGangotri

गर्भमसौमृगाक्षीगर्भोप्यवर्द्धतशनैरभवच्छरीरं।तेजोतिरेकविनिवारितदृष्टिपातंविश्वंरवेर्दिव
समधाद्द्वयोग्रतेजः॥५७॥गर्भालसाभगवतीगतिमांद्यमीषदापेतिनाद्भुतमिदंधरतेशिवंया।योवि
ष्टपानिबिभृतेहिचतुर्दशापियस्यापिमूर्तयिदमावसुधाजलाद्याः॥५८॥संध्यात्मवानपिशरीरम
शेषमेवनोपाश्विराविरसकाममकृतात्रकांचित्।यत्पूर्वमिवमहसादुरतिक्रमेणव्याप्तंशरीरमदसी
यममुष्यहेतोः॥५९॥रम्याणिगंधकुसुमान्यपिगर्हितान्यस्यैनाधातुमैश्यतभराक्तिमुभूषणानि।यद्य
त्कुरूपदमस्तिपदार्थजातंतत्तद्विधारणविधावलसाबभूव॥६०॥तांदोहदंभृशमबाधतदुःशरा
रिःप्रायःपरंकिलनमुंचतिमुंचतेपि।आनीतदुर्लभमपोहतियाचतेन्यत्तच्चाप्यपोह्यपुनरर्द्दितिसा
न्यवस्तु॥६१॥तांबंधुनागमदुपश्रुतदोहदार्तिराद्रायदुर्लभमनर्घ्यमपूर्ववस्तु।आस्वाद्यबंधुजन
दत्तमसौजहर्षहाहंतगर्भधरणंखलुदुःखहेतुः॥६२॥मानुष्यधर्ममनुसृत्यसमयेदमुष्कंकापियथा

© Dharmartha Trust J&K. Digitized by eGangotri

शिवमहोभरणेनबध्वाः।सर्वव्यथाव्यतिकरंपरिहर्तुकामादेवंभजंतइतितत्वविदांप्रवादः॥९३॥उ
त्स्यानिसर्गधवलेनमहीयसासास्वात्मानमैक्षतसमूढमुपात्तनिद्रा।संगीयमानमपिगीतविशारदा
द्यैर्विद्याधरप्रभृतिभिर्विनयोपयातैः॥९४॥आकर्णयत्त्रयजयेतिवरंदधानारक्षेतिशब्दमवलोक
यमाद्दशेति।आकर्ण्यनोत्थितवतीपुनरुक्तशब्दंसाविस्मिताकिलमृणोतिनिरीक्षमाणा॥९५॥नर्मो
क्तिहृत्यामपिखिद्यमानाकिंचापिचंचत्तरमंचरोहे।जितामुदान्यानतिहृद्यविद्यासिंहासनेसौस्थिति
मीक्षतेस्म॥९६॥समानतासात्विकवृत्तिभाजांविरागतावैषयिकप्रवृत्तौ।तस्याःस्त्रियोगर्भगपुत्रचित्र
चरित्रशंसिन्यजनिष्टचेष्टा॥९७॥तद्रोमवल्लीरुरुचेकुचाभ्यामृणवत्प्रभाधुन्युरुशैवलालिः।यत्राक्षिणो
रस्यकूलेप्रशस्तोन्यस्तोविधात्रेवनवीनवेणुः॥९८॥पयोधरद्वंद्वमिषादमुष्याःपयःपिबत्यर्थविधान
योग्यो।कुंभौनवीनामृतपूरितौद्वावंभोजयोनिःकलयांबभूव॥९९॥द्वैतप्रवादंकुचकुंभमध्येमध्येपुन

© Dharmartha Trust J&K. Digitized by eGangotri

र्मौध्यमिकंमतंच।सुभ्रूमणेर्गर्भगएवसोमोऽद्रागार्हयामासमहात्मगर्हे॥७०॥लग्नेशुभेशुभयुतेसु
षुवेकुमारंश्रीपार्वतीवसुखिनीशुभवीक्षितेच।जायासतीशिवगुरोर्निजतुंगसंस्थेसूर्येकुजेरविसु
तेचगुरौचकेंद्रे॥७१॥हृष्टासुतौशिवगुरुःशिववारिराशौमग्नोपिशक्तिमनुसत्यजलेन्यमांक्षीत्॥
यश्राणायद्बहुधनंवसुधाश्वगाश्वजन्मोक्तकर्मविधयेद्विजपुंगवेभ्यः॥७२॥तस्मिंदिनेमृगकरीन्द्र
नरक्षुसिंहसर्पाखुमुख्यबहुजंतुगणाद्विषंतः।वैरंविहायसहचेरुरतीवहृष्टाःकंडूमपाकृषतसाधु
तयानिघृष्टाः॥७३॥वृक्षालताःकुसुमराशिफलान्यमुंचन्नघःप्रसन्नसलिलानिखिलास्तथैव।जा
नामुहुर्जलधरोपिनिजंविकारंभूभृद्गणाद्दापिजलंसहसोत्पपात॥७४॥अद्वैतवादिविपरीतमताव
लंबिहस्ताग्रवर्तिवरपुस्तकमप्यकस्मात्।उच्चैःपपातजहसुःश्रुतिमस्तकानिश्रीव्यासचित्तकमलं
विकचीभूबेव॥७५॥सर्वाभिराशाभिरलंप्रसेदेवातैरभाव्यद्गुलगंधोदिव्यः।प्रजज्वलेपिज्वलनैस्तदा

© Dharmartha Trust J&K. Digitized by eGangotri

नीमदक्षिणीभूतविचित्रकीलैः॥७६॥सुमनोहरगंधिनीसतांसुमनोवद्धिमला।शिवंकरी।सुमनोनि

करप्रचोदितासुमनोहृष्टिरभूत्तदाद्भुतं॥७७॥लोकत्रयीलोकदृशेवभास्वतामहीधरेऐवमहीसुमे

13 रुणा।विद्याविनीत्येवसन्नीसुतेनसारराजन्ततात्दशराजतेजसा॥७८॥सत्कारपूर्वमभियुक्तमुहूर्त

वेदिविप्राः शशंसुरभिवीक्ष्यसुतस्यजन्म।सर्वज्ञएवभविताररचयिष्यतेचशास्त्रंस्वतंत्रमथवागधि

पांश्चजेता॥७९॥कीर्तिस्वकांभुविविधास्यतियावदेषाकिंबोधितेनबहुनाशिशुरेषपूर्णः।नाएछि

जीवितमनेनचतैर्नचोक्तंप्रायोविदन्नपिनवक्त्यशुभंशुभज्ञः॥८०॥तज्ज्ञातिबंधुसुहृदिष्टजनांगनास्ता

विश्रम स्तंसूतिकागृहनिर्योनिरधुः।सोपायनास्तमभिवीक्ष्ययथानिदाघेचंद्रंमुदंययुरलीवसरोजवक्त्रं॥

॥८१॥तत्सूतिकागृहमवेक्षतनप्रदीपंतत्तेजसाथदवभातमभूत्क्षपायां।आश्चर्यमेतदजनिष्टसमस्त

जंतोस्तन्मंदिरंविततिमिरंयदभूद्दीपं॥८२॥यत्पश्यतांशिशुरसौकुरुतेशमग्र्यंतेनाहूतास्यजनकःकि १२

© Dharmartha Trust J&K. Digitized by eGangotri

लशंकराख्यां॥ यद्वा चिराय किल शंकरसंप्रसादाज्जातस्ततो व्यधित शंकरनामधेयं॥७३॥ सर्वैर्विदन्स
कलशक्तियुतोपि बालो मानुष्यजातिमनुसृत्य चचार तद्वत्। बालः शनैर्हसितुमारभत क्रमेण स्रस्तुं शशा
कगमनाय पदांबुजाभ्यां॥७४॥ बालेथ मंचे किल शायिते स्मिन्सतां प्रसन्नं हृदयं बभूव। संवीक्ष्यमाणेम
णिगुच्छवर्यैर्विद्रुमसुखं हंत विनीलमासीत्॥७५॥ संताडयन्नहं तशनैः पदाभ्यां पर्यंकवर्यं कमनीयशा
य्यं। विभेद सद्यः शतधा समूहान्विभेदवादींद्रमनोरथानां॥७६॥ द्वित्राणि वर्णानि वदंस्समुष्मिन्देतप्रवा
दादधुरेव मौनं। यदा चलत्संघ्रिसरोरुहाभ्यां दिशः पलायंत दशापि सद्यः॥७७॥ उदचार यदर्भको गिरः
पदचारान्ततनोदनंतरं। विकलो भवदादिमां तयोः पिकलोकस्वरमान्मरालकः॥७८॥ नवविद्रुमपल्लवा
स्तृतामिव काश्मीरपरागपाटलां। रचयन्नचलां पदलिपि स चचारेंदुनिभः शनैः शनैः॥७९॥ मूर्द्धनि हिम
करचिह्नं निटिले नयनांकमंसयोः शूलं। वपुषि स्फटिकसवर्णं प्राग्जातं वीक्ष्य मेनिरे शंभुं॥८०॥ राज्य

© Dharmartha Trust J&K. Digitized by eGangotri

श्रीश्रिवनयकोविदस्यराज्ञोविधेवयसनदवीयसोबुधस्य।शुभ्रांशोश्छविरिवशारदस्यपित्रोःसंतो
षैःसहघट्टधेतदीयमूर्तिः॥९१॥नागेनोरसिचामरेणचरणेबालेंदुनाभालकेपाण्योश्चकगदाध
नुर्ईमरुकैर्मूर्द्धित्रिशूलेनच।तत्रस्याद्भुतमाकलय्यललितंलेखाहृतेलांछितंचित्रंगात्रममंस्ततत्र
14 जनतानेत्रैर्निमिषोज्झितैः॥९२॥सर्गेप्राथमिकेप्रयातिविरतिंमार्गेस्थितेदौर्गतेस्वर्गेदुर्गमतामुपेयु
षिभ्रशंदुर्गेपवर्गेसति।वर्गेदेहभृतांनिसर्गमलिनेजातोपसर्गेखिलेसर्गेविश्वसृजस्तदीयवपुषाभर्गो
बतीर्णोभुवि॥९३॥इतिश्रीमाधवीयेतदवतारकथापरः॥संक्षेपशंकरजयेसर्गःपूर्णोद्वितीयकः॥२॥ ॥

श्लो॰ १५८

© Dharmartha Trust J&K. Digitized by eGangotri